शेष्यत्वरूपहेतुर्नसिद्धः अनुमानेतुल्यवृत्तिवेद्यतापन्नमानाभावात् नो हेत्वंतरमाह [illegible]विशेष्यकतत्संबंधकतद्वि
षणकज्ञानविशेष्यत्वासिद्धावपि सेकादिविशेष्यकविशिष्टज्ञानसिद्धेर्वतत्र सकथंहेत्वासिद्धिरिति भावः [illegible]क्तपदार्थवि
[illegible]स्वविशेष्यकघटादिविशिष्टज्ञानवत्ताप्रयोज्यपदेनस्मारितघटादिसंसर्गवत्कर्मत्वादिकमिवेत्यर्थः यदुक्तत्वकथने आ
लोके त्वगर्भहेत्वभिप्रायेण इत्यस्यानंतरमनुमेयाप्रतिपूरणीयं तेनैव समं तदनंतरमित्यर्थकं ततश्चैतत्पूर्वोक्तसंबध्यते अ
[illegible]पक्षज्ञानानुमाने प्रकृतवाक्यार्थज्ञानमेव साध्यमुपगंतव्यं तस्य च वाक्यांतरार्थज्ञानसाधारणरूपेण साध्यत्वे तेनैव रू
पेण तस्य प्रकृतवाक्यार्थसाधकहेतौ प्रवेशनीयतयाश्रयासिद्धावपि हेतुसत्वेन तत्र पयःकरणकत्वादिसंसर्गवत्व सत्वेन

म॰ग व्यभिचारः स्यादित्यर्थान्तरज्ञानव्यावृत्तरूपेणात स्य साध्यता स्वीकार्या तत्स्वरूपं प्रकृतवाक्यार्थविषयकत्वमेव त

७३ स्य च वक्तृज्ञानानुमितेः पूर्वं दुर्ग्रहं तथा च व्याप्तिग्रहसंभवः न च वा विशेष्यमनेन भान्यतं तद्विशेषणता विशिष्टज्ञानत्वे

नैव साध्यतास्वीकरणीया तथा च न साध्यस्य वाक्यार्थघटितत्वमिति वाच्यं तथा सति वाक्यार्थसाधकानुमानपक्षे सेका

दिरूपविशेष्यपदार्थेवपः करणाकत्वादिविशिष्टज्ञानविषयत्वादिरूपहेत्वसिध्या वाक्यार्थसाधकानुमानावतारादि ८

सेतसामान्यव्याप्त्याऽपसिद्धसाध्यसिद्धिर्विवादासहायकत्वात् साध्यान्तरसाधकत्वे ति प्रसंगादित्याशयेन शंके

तेनान्वितिविषयकज्ञानविशेषविशिष्टवाक्यान्तरार्थज्ञानव्यावृत्तरूपावच्छिन्नमुक्तं ज्ञानमित्यर्थः अर्थस्य च अर्थविशेषविषयकत्वमे २६६

व विशेषः अर्थान्तरज्ञानव्यावर्तकरूपं अर्थाधीनोऽयं अर्था धीनपदार्थान्तरं मानाभावादिति शेषः नन्वेवमर्थेनैव राम

विशेषो हि निष्प्रकारकपाधिपांस्तावत्प्रकारिकायां विशेषस्य व्यावर्तकरूपस्य हेतुरुक्ती पपाऽर्थाधीनान्तरज्ञानव्यावर्त ७३

क रूपं अर्थेनैवार्थादर्थविषयकत्वाद्धाऽभिन्न एव ननु लाद्दिनं साकांस्यादिमते विषयविषयिभावानिपाम्कतपाघता

[illegible]

ज्ञानस्य स्वात्मकघटादिविषयकत्वपात्विषमभेदकं [illegible] घटसंपटत्वादिरेव भेदकः ननु ज्ञानातिरिक्तः । विषय-
तन्भेदकः बाह्यार्थस्यालीकत्वादिति तन्मते ऽर्थस्यैव भेदकत्वं अनुपपन्नमनन्तमतं मतिक्षिपाति [illegible] कारतयेव [illegible] वा स्वा
र्थभंगे कदाचिद्घटाकारं कदाचित्पटाकारं ज्ञानमित्यत्र विषयेन्द्रियसंनिकर्षादेर्नियामकत्वासंभवाद्बाह्यार्थस्य प्रामाणिकत्वे
४ मानाभावे [illegible] ज्ञानस्य घटपटादिस्वरूपतात्मकतत्तदाकारताविरहेणेत्यर्थः इति कारिकाव्याख्या ननु सुविभक्तेरनुशासनि ९
कातिरिक्तेऽप्यर्थे लक्षणया साधुत्वे कर्तृत्वाद्यर्थे षष्ठ्यादिविभक्तेरनुशासनमफलं अनुशासनं विनापि तत्तीयापाअभेदार्थ १०५
[illegible] रेव कर्तृत्वाद्यर्थे षष्ठ्यादेः लक्षणया साधुत्वसंभवात् रूपात्मत्वे इत्यादि सूत्रैर्मत्यपानुशासनमप्यफलं तत्फलं हि आदेशो ८
४ नस्यादिना आदेशिनो ऽभावे रूपस्थापनेकर्मत्वादिबोधोपपादनं सुविभक्तौ लक्षणास्वीकारे अभावनुपस्थापनैस्त्वादिनाल
क्षणया कर्मत्वादिबोधनसंभव इति एवमनुशासनं विनापि विभक्ते स्थाने रेसाधुत्वे घटेकपोर्ह्दि वदने इति अनुशासनमप्य
फलं स्यकं एकत्वं वक्तीत्यन्वयैकवचनसंज्ञासामर्थ्यादेव एकवचनादेरेकत्वाद्यर्थतालाभात् अन्ये के चित् अनुशासनसार्थक्या

कृ० ७०७६० २५५४२

[illegible]

मू॰ग पैकविभक्तेरपरविभक्त्यर्थलक्षणानुपगमात् अभेदस्य वाच्यविभक्त्यंतरार्थत्वविरहेन अनीपातलक्षणापास्त्वाद्विभक्तेन अद्वंड

७४ लक्षणेन्ती प्रवादाविरोध इत्याहुः मिश्राः । विशेषपदस्य विशेषज्ञानेनलक्षणाविशेषश्चेनरस्या इतिः अर्थस्येतंभे ४

दानुमानेल्लिंगत्वेपिलिंगज्ञानस्येवानुमितिजनकतया अर्थपदमप्यर्थज्ञानलाक्षणिकमितौपचारिकपदप्रयोग

४ न्तीमामांसोपचारित्वमितिव्याचक्रुः । वाक्यार्थज्ञानविशेषइतिमहत्नवावयांविशेषितज्ञानमित्यर्थः तस्यता द ४

४७४७ शज्ञानस्य अप्रासिद्धावाक्यार्थाग्रहेण व्यक्ताज्ञानानुत्तरमज्ञानेन अतएव वाक्यार्थस्य पूर्वमग्रहादेव आसत्तिमतार

४७ प्यारूपदोषराहित्यमित्यर्थः इत्तिज्ञानुशक्यमितिसर्वत्रार्थे ऽभ्यां तत्त्वस्यासत्त्वस्य वाकुत्रापि पुंस्त्वसत्वेनप्रकृतेनवाक्या ४

र्थमंतर्भाव्यस्वीकरणीयमीदृशज्ञानमशक्यमित्यर्थः शाब्दएवेतिएवकारेण व्यक्तज्ञानानुमितिमतंनिरूपापाभावेन प्र~एम

~ हृतवाक्यार्थसिद्धौतात्पर्यस्य इदंधारणतयातज्ज्ञानहेतुतायाबाधकमस्तित्वेनयुक्तिसहस्रेणापितत्साधनमशक्य । ७४

— मितीतदहेतुत्वेदार्शितानुपपत्त्योअन्यथैवसमाधेयाइत्याशयेन दृष्टान्तेनाद्विन्नितयापीतिनातात्पर्यज्ञानेनानियमतोबो—

([illegible])
([illegible])

[illegible]

क्यार्थज्ञानापेक्षणेपीत्यर्थः अर्थाविशेषसि[illegible]ः विशिष्यप्रकृतवा[illegible]क्यार्थसिद्धः [illegible]शेषेण व्याप्यग्रहादिनिसह
तवाक्यार्थज्ञानस्यमानासिद्धाविशेषरूपेणतद्ध्यास्यग्रहात्पारिशेषानुमानाप्रवृत्त्यासंसर्गसाधकहेत्वसिद्धेः प्रकृत
विशेषणसंसर्गतत्प्रमाविषयत्वयोः सहचाराग्रहेणतदीयपर्यन्तेरग्रहेणापि संसर्गानुमानाप्रवृत्तेरित्यर्थः साध्यहेत्वो
[illegible]रेकपदार्थघटितत्वेप्रकृतहेतुसाध्यसजातीयहेत्वन्तरसाध्यान्तरयोर्व्याप्तिग्रहादपिप्रकृतहेतोपक्षधर्मताज्ञानात्
पक्षेप्रकृतसाध्यस्याप्रसिद्धस्यासिद्धिः अन्यथापाकादिविषयककार्यतानाज्ञानादेर्विशेषतोऽज्ञानेपिस्नपानादिका
र्यतानाज्ञानतद्गोचरप्रवृत्त्यायोः व्याप्तिग्रहात्प्रयोज्यत्वदारोपकादिकोनाज्ञानादेः सिद्ध्यनुपपत्तेः प्रकृतसाध्यानिर्वाहा [illegible]
दित्तिसमाधत्तेनयथापरन्तेजानातीति कार्यतयेत्यादिः सामान्यतोव्याप्तिग्रहापेक्षावप्रकृतहेतुजातीयेष्वचित्साध्य [illegible]
जातीयव्यभिचारग्रहेसामान्यव्याप्त्यानुमित्सनुदयात् नचपाकरूपपक्षेप्रकृतिविषयत्वरूपहेतुनाकार्यताज्ञानावि
षयत्वसाधनेनैवपाकविषयककार्यताज्ञानसिद्धौअन्यदीयव्याप्तेरन्यासिद्धौपपिकल्पप्राणिकमित्तिवाच्यंतावता

[illegible]
[illegible]

मू. ग्रा. यदि तत्पुरुषीयपाककार्यताज्ञान ।सिद्ध्यनिर्वर्तितस्वरूपे कार्यताज्ञानसंशयानिवृत्तेः तत्पुरुषीयतत्कालीनकार्यताज्ञा
१५ नस्यैव प्रयोजकत्वे इष्टव्याप्यान्वयव्यतिरेकानुविधानग्रहेण शब्दस्यानुभावकता नास्ति ईदृशकार्यता[redacted]ज्ञानसिद्धेरा
वश्यकत्वात् ॥ अथ मिश्रास्तु रानदवशापसेवस्य लाक्षणिकत्वानुसरणबीजत्वमाहुः वेशाविरोधेन दीपसंख्याविशेषप्रत्यायने
त्याधीनं पदशांगुल्युत्क्षेपणं तद्दीपसंख्याविशेषाभिप्रायपूर्वकमिति [redacted] सहचारदर्शनं पटादिक[redacted]मंतर्भाव्य पत्रं
तेन तत्कालिघटः संनीतिमश्रुतानेन तदेदशांगुल्युत्क्षेपणं इष्टघटविषयकघटीपदशत्वसंख्याभिप्रायं ज्ञात्वा घटे तादृशा
भिप्रायविषयत्वेन दशत्वसंख्यामनुमिनोति तत्र घटीपदशत्वसंख्याभिप्रायपूर्वकमिति सामान्यव्याप्त्या ताहशविशेषादर्शनाद
शसंख्याभिप्रायस्य सामान्यतस्त्वग्रहसंभवेपि सामान्यतो आस्यैव घटे दशसंख्याभिप्रायविषयत्वं ज्ञानमित्यर्थः नच
तेन घटंपदशीकस्य दशांगुल्युत्क्षेपणप्रयोजकसंख्याविशेषप्रत्यायनेच्छाविषयत्वेन हेतुना दशसंख्याभिप्रायविषयत्व
स्यातादृशप्येण व्याप्त्यैव संभवादुद्देश्य सिद्धिः अत एवा मिश्रा[redacted]मुक्तानुरागेन पथावेत्यादिफक्किकावतारणमप्युक्तमिति वाच्यं यतो

[illegible]
[illegible]

कहेनानुकसाध्यस्यताद्रूप्येण सह चारज्ञानं नासीत् एकधादि संख्याभिप्रायविषयं [illegible] दावेव [illegible]
[illegible] कधार्थगुल्फक्षेपणं दृष्टापदीपं प्रतीनीवाधीनेयत्संख्यागुल्फक्षेपणं [illegible] तत्राहे [illegible]
[illegible] तत्संख्याभिप्रायपूर्वकमितिसामान्यतो व्याप्तिर्गृहीतातन्नापि घटे दशांगुल्फक्षेपरादर्शनात्तदीपदशत्वज्ञानस्या
नुभविकत्वयाऽन्यदीपव्याप्त्याऽन्यसाध्यसिद्ध्युपगमस्यावश्यकत्वात् [illegible] रि वाक्यार्थज्ञानस्यैकत्वसंसर्गानुमानेऽपेक्षि
तत्वात् हि शेष्ये तत्त द्विशेषणाविशिष्टज्ञानाविषय [illegible] त्वासिद्धेर्वनिर्वाहात् अतो भ्रमाप्रजन्यान्यतर [illegible] जन्यवाक्ये प्र
योक्तृत्वरूपगुरुहेतुकत्वपक्षकालु [illegible] नपुक्तमित्याशयेनवाक्यपक्षकवाक्यार्थज्ञानसाधक [illegible]
मनुमानमाह पदेत्ति साकांक्षेति सेकादिविषयकं पत्तेकादिसाकांक्षपयःकरणकत्वादिविषयकज्ञानतद्धेतुक
मित्यर्थः आप्तोक्तत्वेति भ्रमादिशून्यत्वमेवात्राप्तत्वं तथा च भ्रमाद्यजन्यत्वे सतीत्यर्थः एतच्च भ्रमा [illegible] जन्यवाक्ये राम
विशिष्टवाक्यार्थज्ञानजन्यत्वरूपसाध्यशून्ये व्यभिचारवा [illegible] रणाय विशेष्यदलं एतदर्थं प्रमत्तेत्यादेकुत्वं चसेकादि

म.शा. विशेष्यसाकांक्षपदकरणकत्वादिविशेषणप्रतीतौ घोघटितत्वं न प्रमानपूर्वकसंसर्गानुमानव्यवच्छेदः भ्रमादि
७६ निरासासंभवेन परिशेषानुमानानिर्वाहेण हेतुत्वासिद्धिरिति भावः एवं च शब्दस्यानानुवादकत्वमित्याशयः तात्पर्या
वधारणार्थमिति उक्तयुक्तिभिस्तात्पर्यज्ञानस्य हेतुतायास्तावदावश्यकत्वादिति भावः संसर्गविशेषप्रतीतेः प्रकृ
तवाक्यार्थप्रतीतेः अभ्युपेयत्वादिति तथा च तदर्थं वाक्यार्थज्ञानानुमानस्य भवतापि स्वीकरणीयत्वपातः उपा
यानुसरणं द्वयोरेवावश्यकमिति भावः अन्यथा शाब्दबोधापत्तेरेव अशाब्दवाक्यार्थप्रतीत्यनभ्युपगमे तात्पर्यनि
रूपणमिति वाक्यार्थविशेषोपरक्ततात्पर्यज्ञानासंभव इत्यर्थः अत एवाशाब्दवाक्यार्थज्ञानस्य प्रागभ्युपेयत्वादेव
आलोकत्वेऽपि वाक्यस्येत्यादिः निरूपणनिर्णयः प्रकारमिति वक्तरि प्रकृतवाक्यार्थभ्रमादिनिरासासंभवादिति भा
वः अर्थं वाऽभ्युपगमवादः वाक्यार्थप्रमात्वापि स्वीयभ्रमत्वाभाववक्तृप्रकृतविशेष्यसाकांक्षप्रकृतविशेषणज्ञान राम
करत्वादिरीत्या वक्तरि प्रकृतवाक्यार्थभ्रमादिनिरासासंभवेन परिशेषानुमानानिर्वाहात् अन्यथा परिशेषानुम ७६

नांतरमेव संसर्गानुमानात्परिशेषानुमाननिर्वाहकभ्रमादिनिरासे संसर्गानुमानापेक्षा प्रामाण्यापाताल्
ननु वाक्यार्थज्ञाने तात्पर्यधियो हेतुत्वपातात्पर्यज्ञानमपेक्षणीयं वाक्यार्थज्ञानं च प्रथमतः कथं भवेदित्याशंकां निराक-
रोति शब्दमिति प्रथमं तात्पर्यज्ञानात्पूर्वं न भवतीति नैवं तात्पर्यज्ञानस्य हेतुत्वादिति भावः ज्ञानांतरमानुमानिकसं-
सर्गज्ञानं भवत्येवेति तत्र तात्पर्यज्ञानाहेतुत्वादिति शेषः न चैवमिति एवं शाब्दस्य पूर्वं तात्पर्यज्ञानानुरोधेन शाब्दवा-
क्यार्थस्याप्रामाण्यमिति नानुभावकमित्यर्थः भवेदिति शेषः प्रागेव सिद्धेरिति प्रागेवानुमानतः प्रमत्वादिप्रमज्ञा-
नानिष्पत्तेरित्यर्थः तथापि नित्यतात्पर्यज्ञानहेतुतापाअनपवादादिति भावः वेदस्थले वाक्यार्थस्य प्रमाणांतरानव-
धार्यत्वपाद्विलक्षणसामग्र्या आवश्यकत्वाल्लौकिकवाक्यजविलक्षणानुभवोपि सामग्रीवलात्सिद्ध इत्येव समाधा-
नमत्र तु गौरदेशमतीतिजनकत्वं शक्रकादिवाक्यस्यापि तादृशप्रतीतिर्दीदृशानुमाने च भ्रमादिनिरासस्य वापेक्षितः ननु
प्राथमिकमन्यतरजन्यत्वसाधकानुमानमपि तत्साध्यस्यान्यहेतुत्वघटकत्वात्तत्प्रतीतीच्छयोपपद्यत इति त्वं वा विशिष्टवाक्या

[illegible]

मू.ग. र्थगर्भमिति वाक्यार्थमज्ञात्वापि प्रकरणादिना तु यदहं प्रथमानुमाने पिशुनकादिवाक्ये व्यभिचारवारणाय पदस्य वैशे
७१ न हेतुघ्वास्याभानात् तद्‌स्यापेक्षितत्वपातस्यावश्यापेक्षत्वात् सामान्यव्यास्यात् कवाक्यवदिति हेत्वंतसंगतिः तदर्थ
श्चाभ्रमायनेन कर्मत्वादिसाकांक्षपदादिमत्ती नीपपोद्घरितत्वं कर्मत्वादौ घटादिविशिष्टज्ञानजनकं मदीयं घट
मित्यादिवाक्यमिवेत्ती एतदनंतरं रत्येवानुमेयमितिपूरणीयं ततरत्यस्य रावमित्यस्य पूर्वपूरणीयैं अनुपेमं इत्यनेन
संबंधः एतेपदार्था इत्यादिकं पूर्ववद्व्याख्येयं ससरजतज्ञानं रजतत्वाविशिष्टज्ञानाद्विषयरजतत्वसंसर्गिधर्मि
वादित्यर्थः शब्दस्यानुवादकत्वमुपसंहरति स्वमिति वेदतुल्यतये वेदवत्तस्यलेकूससामग्रीसम्भवदिनत पेत्यर्थ
कंके ज्ञानावच्छेदकनये विवक्षानानुमाने साध्यतावच्छेदकनयेत्यर्थः तदनुमानादिति शेषः सिद्धेरित्यग्रिमेणान्वयः
एन घाच्यार्थघटितसाध्याभिप्रायेणोक्तं पायार्थस्य प्रकृतविशेषणवाद्विशेष्यकृतस्वरूपतयावाक्यार्थस्य प्रवेशात्तदनुमा एम
नेविशिष्टज्ञानत्वेन साध्यत्वे तु तन्मते तत्सिद्धिरित्याशयेनाहतदनु पञ्ची वैनि त्यादिना अभिहितादित्यादि सिद्धेरित्यंतमयम ११

र्थत्वात् ज्ञानानुरोधेन निष्प्रमतः स्वीकार्यत्वादिति शेषः प्रमाद्यभावानुमानानंतरं वक्तृज्ञानानुत्तरं अभ्युपगम्यैवानिर्वा
हपक्षो मतमुपन्यस्यति यत्तिति परंतु सं सर्गाग्रहो भ्रमहेत्तिपाठः संसर्गाग्रहाभावो भ्रमहेत्वर्थः भ्रमस्याविशिष्टज्ञानाना
त्मकत्वाभ्रमस्थले संसर्गाग्रहस्यावश्यकत्वात् स एव भ्रमहेतुरित्यभिमानं. परंतु संसर्गाग्रहो भ्रमहेत्ति क्वाचित्कः पाठः न
त्वयथाश्रुते असंसर्गाग्रहाभावस्य संसर्गाग्रहानात्मकतया तदभावः संसर्गाग्रह एवेत्यसंगतेश्च तो भ्रमपद पूर्वमका
रमस्लेषेण असंसर्गाग्रहाभावः अभ्रमः भ्रमाभावः तदभावः तदात्मकोऽभावः संसर्गाग्रह एवेत्यर्थः आप्तत्वानु
मानांतर्गतमेवेति अभ्रांतत्वानुमानात्मकमेवेत्यर्थः वक्तृज्ञानानुमानं वक्तृसंसर्गज्ञानानुमानं नास्तीति भ्रमाभावेन लिं
गेन वक्तृज्ञानमनुमेयमिति असंसर्गाग्र[illegible]
हविशिष्टधर्मधर्मिविषयकज्ञानद्वयमित्यर्थः तदभावश्चेति विशेष्यभूतज्ञानद्वयकालीनस्तादृशविशिष्टाभाव श्चे
त्यर्थः गृहीतभेदं ज्ञानमिति धर्मिधर्माभाव विषयक ज्ञानरूपज्ञानविशेषणाभाव इत्यर्थः ननु तयोः संसर्ग ग्रह इ

२७ग विशेषः संसर्गाग्रह एव कथं न भ्रमस्याकांक्षायामाह गृहीतेति पतंस्तुषु सौ ज्ञानसामान्याभावसत्त्वेन संसर्गज्ञानाभावसत्त्वे शब्दखंड

७८ ऽपि न पुंसि भ्रान्तत्वव्यवहार इत्यर्थः [illegible]ज्ञानानुमानाभि[illegible] आवश्यकमिति शेषः आप्तत्वानुमानस्य वक्तृसंसर्गज्ञानानु

मानत्वोपगमे प्रथमानुमानं वक्तृज्ञानानुमानाधीनपदार्थसंसर्गानुमानं चेत्यर्थं इत्याह [illegible]वेति [illegible]लिंगज्ञानं प ४५७

यथार्थज्ञानानुमापकमिति शेषः [illegible]दृशमेव तज्ज्ञानमेवेत्यर्थः नमकं[illegible]शाब्दप्रमाजनकमस्तु तन्मते यथार्थ(ज्ञान)ता ४०

२० त्पर्यस्यैव वक्तृयथार्थज्ञानानुमापकत्वादिति भावः अस्मन्ते भ्रमाद्यभावसहितभ्रमादिविशिष्टसामान्यतरजन्यस्य २०६७

४५७ योक्तत्वरूपहेतुज्ञानस्य यथार्थज्ञानानुमापकतया गौरवे तात्पर्यशाब्दप्रत्ययहेतुपा यथार्थतात्पर्यज्ञानस्यैव वेन ५५००

हेतुतया मागदृत्तित्वेन तन्निर्वाहाय संसर्गानुमानस्य वक्तृज्ञानानुमानस्यावश्यकता उक्तहेतुघटकविशेष्यभाग राम

४ सिद्ध्यर्थं प्रथमानुमानस्य तथात्वमिति भावः केचित्तु अभ्युपेत्य भ्रमा[illegible]नुमानस्य वक्तृज्ञानानुमानत्वं भ्रमाभा ७८

वानुमाना[illegible]तरं वक्तृज्ञानानुमा[illegible]नं कर्तव्यमेवेतीत्यपतिमाह केचेत्यादि पादशालिंगामिति वक्तृप[illegible]र्थज्ञानानुमा

२० ४ २७४ १५०४ ६०

१ कालिंगघटकं प्रत्यक्षशून्यत्वमित्यर्थः सहकारी सामर्थ्यलक्षणेन देवदत्तस्य संसर्गानुमापकम् अयं पदार्थोऽवाच्यार्थधीपरत्वं पदार्थ
पदार्थप्रतीतीच्छ पोषकारित्वं पदार्थमिति तात्पर्यं पदार्थं प्रयोजकं शाब्दप्रमाजनकज्ञानविषयः एतज्ज्ञानत्वं जनकतावच्छेदकं तुल्यं
तिष्ठावत्तमोरवादिनी ॥*॥ श्रीहरिः ॥*॥ तस्माकांक्षादिकं सहकारीति पूर्वग्रंथेन तस्मादिनाप्याकांक्षायाः प्र
संगतो निरूपणमारभते अथेति इच्छारूपाया आकांक्षायाः प्रसिद्धत्वादियमिति शाब्दबोधोपयोगिनीत्यर्थः अविनाभावह
निविशेष्यतावच्छेदके विशेषणशून्या वृत्तित्वं विशेष्ये विशेषणशून्यता तात्पर्यविरहोवा अ नाभावपदेनाविवक्षि
तः स चार्थधर्मोपि परंपरासंबंधेन शब्दस्याकांक्षत्वव्यवहारहेतुः तत्रा माहनीलमिति अभावादिलेसरोजत्वा
दिरूपाविशेष्यतावच्छेदके विशेषणनीलाद्यविनाभावादिति भावः तथा च तत्राकांक्षानुपपत्तिरिति भावः तत्र नीलादिविशे
ष्ये सरोजान्यव्याक्तौ विशेषे तदविनाभावसत्वेन द्वितीयपक्षेन दोषः अतस्तत्र [redacted] दोषांतरमाह विमलमिति नघारा जल
न्यापितपातालमर्थाविषयनदीसंबंधस्येत्यर्थः अविनाभूतकथ्यहारति अविनाभूते वाक्यांतरस्थ कुत्र पदार्थव्यक्तौ विशेषस्येत्यर्थः

केवलान्वयिविशेषणस्थलेऽव्याप्तिरनुभयपदस्येति वृध्या समभिव्याहृतेतीति समभिव्याहृततत्पदस्मारितजिज्ञासितस्वार्था
म् ग न्वयकत्वं स्वस्य तत्पदाकांक्षेत्यर्थः उक्तस्थले कपदस्य नद्यादस्यनेन साकांक्षतावारणाय समभिव्याहारनिवेशः पद
७९ योः समभिव्याहाररूपाकांक्षाभागं शाब्दबोधे ज्ञानत एवोपयुज्यते तेन भ्रमेण शाब्दभ्रमात्तत्पदस्मारितार्थयोरन्वयबो
धेऽगतेन योग्यसाकांक्षतावारणाय एकपदार्थे परपदार्थान्वयजिज्ञासानिवेशः स्वविषयज्ञानसिद्धौ जिज्ञासा
नुदयान तद्धारणं जिज्ञासारूपाकांक्षा च शाब्दबोधे स्वरूपसत्युपयुज्यते सा च स्वविषयानुपहितत्वेन विशेषणीया अतो जिज्ञा
४ साद्धितीयक्षणे शाब्दबोधोत्पत्तिस्थले तदानीं जिज्ञासात्वेऽपि नाकांक्षा बोधद्वये व्याप्तस्थलेऽपि एकबोधोत्पत्तिदशायामाकांक्षासत्त्वे वि
शेषविषयतावच्छेदकावच्छिन्नानुपधानं वाच्यं अजिज्ञासोरपीतिन संसर्गबोधेनिष्फलत्वं दुष्फलत्वं वापदायेन गृहीतं तदा राम
तत्फलस्य तादृशाविरहेऽपि नाकांक्षत्वेऽपि वाक्यार्थबोधस्यानुभविकत्वान्नाकांक्षापायअवश्यं स्वीकार्यापाअनुपपत्तेरि ७९
त्यर्थः ननु तत्र मानसएव संसर्गबोधो न तु शाब्दः आकांक्षाविरहादिति तोऽर्थाध्याहारपक्षेपदस्मारितत्वस्याविशेषणस्यनद्येयः

भावाद्व्याप्तिरित्याहुः। विश्वजिता यजेतेत्यत्र श्रुतौ अध्याहृतस्य स्वर्गकामनूपाधिकारिणो द्वाराभत्ति लौकिक
वाक्यवदध्याहृतस्याभिधानरूपस्यार्थस्य पदान्तरस्यापि स्याप्याकांक्षितत्वात् कार्यत्वाभिधानकर्मत्वान्वयबोधाविषयत्वापत्ताकांक्षास ८
ताया आवश्यकत्वादित्यर्थः नद्भावापत्तेरिति शेषः शब्दकल्पनपक्षे शब्दाध्याहारवादिनैयायिकमते इत्युपलक्षणं समभि
व्याहृतेन पदत्वसन्निवेशस्य स्थाने स्थलेशानसामान्यानिवेशः गुरुमते चेत्यपि बोध्यं अर्थेत्यस्य पूर्वेण त्राकांक्षोपपादनावेति विवरणी
यं गुरुमते अध्याहृतार्थस्यश्रुतपदसमभिव्याहृतत्वानुमानोपस्थापितत्वेन तादृशानुमानेन शब्दस्य साकांक्षतोपपत्तिरिष्टत्वाज्जि
ज्ञासितस्य आनयनादेः जिज्ञासितस्वार्थकानयनपदादेः। आकांक्षापन्नेरिति स्वार्थेन कर्मत्वादेर्भेदान्वय इति आदिः अजि
ज्ञासो घटः इत्र शाब्दबोधः तादृशस्थलसाधारणं स्वरूपयोग्यज्ञानितान्वयबोधव्याप्तत्वं जिज्ञासायोग्यताघटितलक्षणमाशंकते
अथेति योग्यतेति सा आकांक्षा जिज्ञासितसंसर्गयोग्यता संसर्गावगमप्रागभावरूपा वा व्याप्तत्वोदक्षरत्वावारणायाह जिज्ञासा चे
ति विशेषाज्ञानेस्व विषयसंसर्गावगमात्प्रागेव भवतीति भावेनुमर्ह्यां तेन तथा च तद्देवपदत्वं तद्रूपेण योग्यतेति भावः योग्यतावेमिता

मू-म दर्शीवमीऽपत्तेरित्यर्थः श्रोतरीति नतस्यदानुसंधानवत्विपुंसीत्यर्थः तद्व्यारणेनेति तत्पदाविषयकतत्तदनुसंधानेत्यर्थः तथाव
८० तत्तत्पदद्विषयकतत्तदनुसंधानव्यक्तिजन्यमहत्तसंसर्गावगमप्रागभावः तदनुसंधानविशिष्टात्मनिष्ठः त्वपोः पदयो रा
कांक्षेत्यर्थः प्रागभावस्यपदेसाकांक्षव्यवहारनिमित्तं स्वप्राप्तियोग्यजनकत्वरूपः संबंधः जनितान्वयबोधदशायांमना
गतानुसंधानजनितशाब्दबोधांतरप्रागभावमादायापत्तिप्रसंगवारणाय तत्तदनुसंधानविशिष्टात्मनिष्ठत्वं एकक्षणाव
च्छिन्नैकात्मवृत्तित्वसंबंधेन तत्तदनुसंधानविशिष्टत्वपर्यवसितं प्रागभावेंशितं तत्तदनुसंधानजन्यत्वविशेषणप्रयोजनं स्व १३
यमाहादिमत्वमित्तिः तात्पर्यवशादिति नघाइत्यस्यकण्ठे [illegible]न्वयतात्पर्यवशादित्यर्थः नघाः नदीसंबंधस्यकण्ठे सं
सर्गावगमात्कण्ठेन संसर्गावगमस्योत्पत्स्यमानत्वात्प्रागभावसत्वेपि तदवगमप्रागभावसत्वेपि तद्व्यारणेनेतिजले
त्यार्थान्वयबोधजनकेन नघाइत्यस्यानुसंधानेनेत्यर्थः कण्ठेसंसर्गावगमोनेत्याग्रिमेण संबंधः तात्पर्यवशादितिजला एम
न्वयतात्पर्यवशादित्यर्थः एतज्जलत्यान्वितत्वेहेतुः जलान्वितनघाइतिजलान्वितजपाभासमानस्यनदीसंबंधस्येत्यर्थः कण्ठेसंस ८०

र्गावगमो नेतिकक्ष्ये न सह संसर्गबोधो न जन्यत इत्यर्थः अतत्प्रागभावः नतदनुसंधानजन्यनदीकच्छसंसर्गाभावः प्र
२०१ सिध्यतीति शेषः तथा च न तदनुसंधानकालेन घो[redacted] इत्यस्य कच्छसाकांक्षतेति भावः तथोक्तेन कर्मत्वादिपदानुसंधा
नजन्यस्य कर्मत्वादौ घटादेर्भेदसंसर्गावगमस्य प्रागभावसंभव इत्यर्थः प्रतियोग्यप्रसिद्धेरिति भावः ननु पत्स्पदात्त्वस
र्गावगमोऽप्रसिद्धः तदनुसंधानमंतर्भाव्याकांक्षाया हेतुत्वकल्पनासंभवात् सामान्यसामग्रीनः तदनुसंधानदशायां
कारणाबाधेन शाब्दबोधापत्तिर्दुर्वारैवेति चेन्न यघदनुसंधानव्यक्तिभिः शाब्दबोधो जन्यते तत्तदनुसंधानजन्यशाब्दबो
१४८ धप्रागभावादिघटितसामग्रीविशेषकूटस्यैव तत्र शाब्दसामान्यानुत्पादप्रयोजकत्वात् प्रागभावस्य सिध्यसिद्धिपरा
हतत्वादिति प्रागभावप्रसिद्धेरप्रसिद्धेश्चोपगमे निराकांक्षव्यवहारस्य व्याघातादित्यर्थः प्रतियोगिसत्त्वेऽभावव्य
वहाराविषयत्वाधात्र असत्त्वे च व्यवहारविषयस्य तदभावस्याप्रसिद्धत्वादिति भावः ननु तदानीं निराकांक्षव्यवहार
स्य तदानींतनप्रागभावप्रतियोगिसंसर्गाव [illegible] गमसामान्ये तदानींतनानुसंधानजन्यत्वाभावा

विषयः संसर्गावगमसामान्येनदानीतंनप्रागभावप्रतियोगित्वतदानतानुसंधानजन्यत्वो

भावोवानथाचनसिद्ध्यासिद्धिव्याघातः

वापद्विषयकत्वेनयदनुसंधानव्यक्तेः यत्प्रकृतसंसर्गावगमेहेतुत्वातत्संसर्गावमप्रागभावाविशिष्टतद्नुसंधानव्य

क्तीनांविषतासंबंधावच्छिन्नाभावकूटस्यतत्पदनिष्ठस्यनिराकांक्षव्यवहारविषयत्वोप[illegible]गमान्नानुपपत्तिरित्यतोसे

षांतरमाहाकुर्वेतिएकः श्रोतावितमत्वंजन्मलभित्यस्यश्रवणेनदीसंबंधस्यजलान्वयप्रतीत्यर्थमेवाकांगाहेनेतिअभ्रुतेवे

त्यंतंतोमन्यभ्रमाइत्तिनष्वंवणेपिकश्चान्वयपरताभ्रमवशेनेत्यर्थः नघाः नदीसंबंधस्यएवमध्येपिसमस्तामित्यभि

मनुरूपयोःज[illegible]लेकच्छेचेनघाइत्तिपदानुसंधानंदीसंबंधानुसंधानजन्यनदीसंबंधावगमोद्यान्वयाइतिफले

नकथोमपसाकांक्षस्यादित्यर्थः तदनुसंधानजन्योमयान्वयबोधप्रागभावयोःनुरूपभेदेनसत्वादितिभावः नचत

त्रश्रोत्रोरूमपसंसर्गावगमादुभयरूपमतिनघाइत्येकपदस्यनदीकच्छोभपसांकाक्षत्वमिष्टमेवेतिवाच्यंजसमभिव्याहत

पदाभ्यां आकांक्षाभ्रमेणैव शाब्दबोधजननात्तत्रासमभिव्याहृतनदीकच्छपदयोर्निराकांक्षत्वापात्त्अवश्यमुपेयत्वा
५६ त्तन्नैवमुभयत्र साकांक्षत्वापत्तिर्नसंगच्छते न घोऽइत्यस्य जलसाकांक्षतायाः स्वत्वादिति काचं उभयसाकांक्षं स्यादि
त्यस्य यथा जलसाकांक्षत्वं तथा कच्छसाकांक्षं स्यादित्यर्थकत्वपा[redacted]तत्संगतेः साधारणलक्षणे इव आंयिपदयोः समभि ७
व्याहारस्य। निवेशनीयत्वान्नायं दोषः तस्य ज्ञातस्यैव शाब्दबोधोपयोगित्वे पाकच्छेनदीसंबंधान्वयबोधस्य तद्भ्रमा
देवोपपत्तेरित्यतः प्रागभावरूपा याः आकांक्षा याः शाब्दबोधहेतुतामेवं खंडयति प्रागभावस्येति तत्पदानुसंधान
विशिष्टतदनुसंधानजन्यशाब्दबोधप्रागभावस्य पदार्थाभावः घटः कर्मत्वं नयः कृष्ण इत्यादौ तत्र प्रथमे कारणान्तरस्य म
०० त्त्वाद्विभक्तयो वा आनुपूर्वीज्ञानरूपस्योत्तरत्रैव समभिव्याहारज्ञानस्य वा अभावस्य आवश्यकत्वादित्यर्थः यथाश्रुतं तु नसं ४
गच्छते घटः कर्मत्वमित्यादिपदानुसंधानजन्यशाब्दबोधापत्तिसंभवात् प्रागभावाभावस्य तदीयकारणत्व[redacted]राभावनि
यतत्वाभिधानविरोधात् क्वचित्तु तत्राप्यकेः पुनरुत्पादः प्रागभावविरहे मैव वारणादुक्तनियमायोगाच्च नचोक्त

५६

मू॰ ग रूपाकांक्षाहेतुत्वमादिना प्रकृतिप्रत्ययानुपूर्वीविशेषज्ञानहेतुत्वमा आनुपगमात् अतः त्वेन प्रागभावरूपाया आकां
दू ८२ क्षाया अन्य [redacted] सिद्धिरित्युपदर्शितव्याख्यानमपि न स्यादिति वाच्यं तत्तदनुसंधानव्यक्तिभेदेनानेतकारणताकल्पनप्र
पेक्ष्यानुपूर्वीविशेषज्ञानहेतुत्वकल्पनमेवोचितमित्याशयेन कारणतराभावसंभवावश्यकत्वाभिधानसंगतेः न च त
उ॰ तथा च व्यक्तिपूर्वं तत्समानविषयशाब्दव्यत्ययेन रैत्यापमानेन तत्र व्यक्तेरुत्पादवारणाय तत्तव्यक्तीनरदनुव्यक्तीनां ननत्व २०कृ॰४
नुत्पादस्त्वणेन ड्यधायकपदानुसंधानव्यक्तिव्यापारत्वेन तत्तदनंतरक्षणे तत्र घ [redacted] त्पादवारणात् तत्प्रागभावस्य कृ॰ त
पेहेतुत्वकल्पनमावश्यकमिति वाच्यं पक्षान्त्वबोधव्यनुत्पादकालेतज्ञानकयोग्यताज्ञानादेरनियमः तदनंतरक्षणे
२०वृ॰उ॰दे ताहशसामान्यकारणाभावादेवतच्छुनुत्पादापत्त्यसंभवात् सर्वत्र प्रागभावरूपाकांक्षाहेतुत्वासिद्धेः न च स्वप्रतियोगि राम
जनकानुसंधानविशिष्टत्वेन प्रकृतसंसर्गावगमप्रागभाव रूपाया आकांक्षायाः अननुगतरूपावच्छिन्नप्रकृतसंसर्गावी ८२
वगमैककारणत्वमेव संभवतीति किमर्थमानुपूर्वीविशेषज्ञानत्वादिना हेतुत्वान्तरकल्पनमिति वाच्यं घटः कर्मत्वमि

स्यादिपदानुसंधानस्यापि पदत्वस्य सामान्यधर्मपुरस्कारेण कर्मत्वं घटीयमित्यादिशाब्दबोधे हेतुतया न द्वितीयसंसर्गा
वगमं प्रागभावत्वलाभादस्य शब्दोपस्थितिवारणाय फलीयधानो [redacted] कजनकतापाएव कारणतावच्छेदकेनिवेश्यतयामाह
रापदानुसंधा [redacted] नेव शाब्दबोधानुपधाने शाब्दबोधानुपधानप्रयोज्यस्यानिरूक्तकारणाविरहस्याप्रयोजकतया आनुपूर्वी
विशेषज्ञानविरहस्यैव तत्प्रयोजकताया उपगंतव्यतया तज्ज्ञानहेतुतायाः तादृशप्रागभावहेतुत्वेप्या [redacted] वश्यकत्वात्
ट॰ नुपँअ. नुमित्यनंतरं समानविषयकानुमित्यंतरवारणाय सिद्धेरनुमितिप्रतिबंधकत्वमुपेयते। तथा शाब्दबोधानंतरमपि
समानविषयकशाब्दधीवारणाय तादृशशाब्दबोधे तादृशशाब्दबोधस्य प्रतिबंधकत्वमावश्यकं ध्वंसप्रागभावयोरत्यंता
१८४४०२ भावाविरोधितामते च शाब्दबोधसामान्यात्यंताभावस्य हेतुता न संभवतीति तत्तच्छाब्दबोधव्यक्तीनां तत्तद्व्यक्तित्वावच्छिन्ना
भावकूटस्यैव समानविषयकशाब्दत्वावच्छिन्नहेतुता वाच्या तथा च तत्तद्व्यक्तित्वावच्छिन्नाभावत्वेन तत्तद्व्यक्तिव्यधिकरणशा
ब्दबोधे व्यक्त्यंतराभावस्यैव तत्तद्व्यक्तिसमानाधिकरणशाब्दबोधे [redacted] न व्यक्तिध्वंसप्रागभावयोरपि हेतुत्वमायातं तत्र प्राव

मी॰ग्र ८३ संसर्गभावहेतुतांतर्गतावर्शितप्रागभावहेतुतैकाकांक्षाहेतुतेत्युच्यतामिति चेन्न इतरयावत्कारणसत्वेशाब्दानुभवानंत
रं तत्समानविषयक शाब्दबोधांतरानुत्पादस्यैवासिद्धतया शाब्दबोधे प्रतिबंधकताया एवासिद्धेः अत एवाग्रिमल
क्षणे अयमेतीत्यादौ राजपुत्राद्यन्वयबोधोत्पत्तिकाले पुरोजे रूपान्वयबोधानुत्पादप्रयोजककारणांतराभावादपि राज
पुरुषान्वयबोधानुत्पादः संभवतीत्यभिप्रायकजनितान्वयबोधत्वरूपाविशेष्यदलवैयर्थ्याभिधानमपि विषयकशाब्दबोधानं
तरं शाब्दबोधांतरानुत्पादे तात्पर्यविहायफलद्वयप्रवेशस्यावश्यकतया तद्विरूप्येतेनानुपूर्वीविशेषज्ञानादेनाप्रागभावरू
पाया आकांक्षाया अन्यथासिद्धेः एकाविधशाब्दबोधे नानाविधानुपूर्वीज्ञानानां हेतुत्वकल्पनमपेक्ष्य घटः कर्मत्व[redacted]
[illegible] मित्यादौ कर्मत्वं घटीयमित्याद्यन्वयबोधवारणाय शाब्दबोध
प्रागभावस्यैव स्वप्रतियोगिकारणानुसंधानवत्वसंबंधेनैकहेतुताकल्पनौचित्यात् न च घटः कर्मत्वमित्यादिपदज्ञानद्वे राम
लोत्तरशाब्दबोधयोग्यतापाकल्पोपधानरूपकारणतायाः निवेशप्रयोजनाभावात् तद्घटितसंबंधेन प्रागभावरूपकारणस्योक्तत्वेऽस ८३

१८०

४६७० त्वेफलानुमादग्रयोर्वारणाय कारणांतरविरहस्य मयोऽप्यत्वाभ्युपगमआवश्यक [redacted] इति प्रागेवोक्तमिति वाच्यं उभयाव
लिकारणतायाः संबंधत्वघटकतया पदज्ञानत्वादिना सामान्यकारणताया व्याहतिसंभवेन फलोपधानानिवेशादनुसंधा
नव्यक्तीनांतत घा कत्वावाच्छिन्नायाः तत घा ककारणतायाः सर्वसिद्धत्वायद्दमित्यादिपदानुसंधानस्थले उभयाद्यन्ति
तादृशकारणताघटितसंबंधेन शाब्दबोधप्रागभावसत्वस्यावश्यकतयातत्रतत्र शाब्दबोधोपपत्तेः नन्वेवं ताद्दशाविशे
षकारणतासंबंधेन शाब्दबोधापत्तिरसिततंपदज्ञानमेव शाब्दबोधकारणमस्तु सामान्यविशेषकारणतयोरवच्छेद्यावच्छेदके
[redacted] भावाभावेन आत्माश्रयानवकाशादिति किं प्रागभावहेतुत [redacted] येति वाच्यं शाब्दबोधोत्तरं कृतिसमानविषयशाब्दबो ४
धोपगमेपि उसन्नतघ के: पुनरुक्तावारणायोक्तसंबंधेन प्रागभावस्यानुगतकरणतो वित्यादित्याशंक्य प्रतिवादिमा
हः एवं चेति उक्तप्रागभावहेतुतायामतिप्रसंगं निराकृत्यानुपूर्वीविशेषज्ञानानांहेतुतासंडने [redacted] त्यर्थः न हेतुत्वमिस्यातामि ७
८ तिरोधः तथा चेंयो शाब्दबोधहेतुतासिद्धांतोभज्येनेतिभावः ननु बाधकमानाभावः शाब्दस्थलेयोग्यतेत्युक्तेनस्य वा त्रुमित्यादिस्य

मू०ग लेशाब्दासाधारणधर्मावच्छिन्नहेतुतापाकृतसत्वात्कथं तद्हेतुत्वमार्पयतां रत्याशंक्यानुमित्यादावपि बाधाभावस्य हे शब्द
८५ तुतां रवेरुपपति न चैवं प्रागभावाभीन रघेवामेस्यर्थः एवमुक्तप्रागभावहेतुतयानातिप्रसंगे प्रागभावाभावे नैव नीअनुमित्यादा
वपि नानाविधबाधादिवुप्रभावहेतुतापेक्षयालाघवेन स्वातिमोगिज्ञनकपरामर्शादिसंबंधेनानुमित्यादिप्रागभा
वस्य हेतुतासंभवात्स्वाधादिकालीनपरामर्शादीनां तत्तद्व्यक्तित्वेन अनुमित्यजनकत्वात् ताहशाकारणबाधेनैव बा
धादिकालेऽनुमित्याद्यभावनिर्वाहात् इत्यर्थः ननु बाधादिदशायां नंतरक्षणे तत्र परामर्शेण बाधनाशेऽनुमितिज
६ ननाइक संबंधेनानुमिति प्रागभावस्य ताहशपरामर्शोत्तरक्षणेपि सत्वाद्विनष्टापामवबाधादिवुद्धावनुमित्याप
त्तिरत्ती वाधाभावस्यानुमितिहेतुत्वमुक्तदिशा वशाब्दबोधहेतुत्वमावश्यकमित्याशंक्य दूषणांतरमाह प्रागभाव
स्य चेति शब्देनासाधारणप्रमिति न शब्दप्रमाणासाधारणम हेतुताव्याधिकरणहेतुताया एवासाधारणहेतुतारूपत्वा राम
दिति शेषः तथा चैतन्मते आकांक्षापाः शब्दासाधारणसहकारिता भज्यते नैभावः ननु शाब्दानुभवमात्रवृत्तिधर्माव ८४

छिन्ननिरूपितोक्तप्रागभावहेतुत्वपेवतद्रूपाकांक्षापाः शाब्दासाधारणसहकारितामवादइत्यत आह अथितेति
उपस्थितोथाप्यव्यवहारविषययोः ससंबाधिकानिः संबंधिकपदाकांक्षायोः तद्व्यवहारनिमित्तभूतोज्ञातिविशेषरूपो
त्केषापिर्षोनस्यान्तभित्यर्थः तदभावोत्ज्ञातिमत्तासंभवान्नृत्तदपिद्दूषणमापातः सिद्धांतेप्यभावरूपाकांक्षोपगम
४७००४ त्ताह शार्थकपदानिष्टतामाश्वाकांक्षापाः अपितादिव्यवहारविष[redacted]यनिपामकतोउपगंतव्यानतुज्ञातिविशेषपो
रितिप्रागभावरूपाकांक्षापक्षेप्युपपत्तेः सोदत्त स्मत्लक्षणमाशंकते अथ्येतिनाप्यः प्रकृतशाब्दबोधवि
षयोपस्तस्पदार्थतदितरपदार्थस्तयोः प्रकृतविशेष्यविशेषणयोरन्वयः संसर्गः ज्ञानांशोविषयितासंबंधेनतत्प्रकारि
काजिज्ञासाप्रकृतविशेष्यतावच्छेदकावच्छिन्नेप्रकृतविशेषणतावच्छेदकावच्छिन्नस्यसंबधविधयापत्प्रकृतसंस
५ र्गविषयकत्वंतदुत्तरकज्ञानगोचरेच्छेतिपावत्तत्तदनुकूलेपेविशेषणयोरूपास्थितीतज्जनकपदानिश्चमज्ञानितासर्प
विषयान्वयबोधकत्वंतादृशविषयतावच्छेदकावच्छिन्नशाब्दबोधानुपधानंतयोस्ताइशान्वयबोधोयोग्यपिकाकांक्षे
१३३५६ १५४७००

१३५७० [illegible]

मू॰ ग सर्थः सरोजं नीलमित्यादौ नीलमित्यादिमात्रोक्ते सरोजमन्यद्वा इत्यादिविशेष्ये नीलादेर्विशेषणस्याभेदसंसर्गजिज्ञा शाब्द
८५ सा सरोजमित्यादिमात्रोक्तौ वाक्ये नीलमन्यद्वा इत्यादि सरोजादिरूपविशेष्ये विशेषणो विशेषणस्याभेदादिसं
सर्गजिज्ञासा जायत इति नाद्यश्शाब्दजिज्ञासानुकूलत्वात्तया नीलसरोजाद्युपस्थितेर्जनकत्वस्य समानविभक्तिकनीलसरोजादिप
७ दयोः परस्परमाकांक्षा अं[illegible]जिज्ञासानुकूलोपस्थितिघटिताकांक्षा इत्यत्र पुरोडाशकपालत्वेन तुषानुपवपतीत्यादौ पुरोडा
८ शस्य कपालमिति तुल्यविषयसमासस्य विरुद्धतोपपद्यते न समासोपगमे हि पुरोडाशकपालपदार्थ ________ प्रयो
जनककपालत्वेनैवोपस्थितिर्भवेत्तथा च सति कपालस्य पुरोडाशरूपप्रयोजनलाभेन प्रयोजनजिज्ञासापायासंभवात्
तुषोपवापरूपप्रयोजनबोधोपयिकाकांक्षा नानिर्वहेदिति ध्येयः कर्मत्वमानयनीत्यादौ क्रियापदप्रकृतिधीनत्तदन्वयिकारकाम
९ कादिजिज्ञासा मात्रमादाय क्रियाकारकपदयोराकांक्षामुपपादयन्ति ध्येयमिति परपातित्वेऽपि जिज्ञासा भवतीत्यग्रिमेणान्वयः ८५
इति जिज्ञासा एवमाद्यशसंशयमूलत्वाद्विशेषणं किंचित्क्रियाविशेष्यकघटकर्मतान्वयबोधो भवत्विति जिज्ञासा [illegible]मन्यद्वा इति जिज्ञासा २७
[illegible]

[illegible]

सेनिघट मन्महे इति संशयमूलाआनयनप्रतेः [illegible] विशेषतः कर्मत्वान्वयबोधो भवतीति छेत्यर्थः [illegible]तीतिन
यावत्तादृशतादृशाङ्डीशासाजनकक्रियाका[illegible]रकोपस्थितिजनकत्वपाक्रियाकारकपदानामेवाकांक्षा निर्वाह इति [illegible]वः ननु १०
२ घटो नीलं [illegible]त्यादाविव घटः कर्मत्वमानयनं कृतिरित्यादावपि अभेदान्वयप्रकारकजिज्ञासाघटिताकांक्षासत्वात्कथं ना
भेदान्वयबोध इत्यत आह घट इति अयोग्यत्वात् अभेद संसर्गघटितयोग्यताविरहात् योग्यताभ्रमे तु भवत्येवेत्याशयः भ्र
म इतिभावः तत्र भेदान्वययोग्यतासत्वात् प्रसक्तं भेदान्वयबोधमाकांक्षाविरहेण वारयति [illegible]सेति घटं नयेमिति भे ४
दान्वयकत्वनात्रेत्यर्थः संबंधित्वे नेति कर्मत्वे विशेषणतयेत्यर्थः अनुपस्थित्याघटकर्मत्वान्वयजिज्ञासानुकूलोपस्थिति
विरहेण । नक्रियावांतदन्वयबोधोपयिकाकांक्षासत्वमिति भावः विशेष्यदलप्रयोजनमाह [illegible]इति अयमेतीत्यस्यपशुत्वे
णेति प्रथमोपस्थि[illegible]न तु तत्पदार्थेनेत्यर्थः न तु रूपमाकांक्षेति न तु रूपपदं साकांक्षं राजपदं तु रूपे[illegible]देन स्वार्थान्वयबो ३
धं जनयति त्विनिता सर्भ अमासुत्रेणान्वयबोधे जनितेपि राजपदस्य पुरु[illegible]न्वयबोधे[illegible]सी कांक्षत्वाद्वाक्यांतरवाक्यार्थबोधे ज

[illegible]

[illegible]

मू-ग ८६ नितेपि महावाक्यार्थबोधेऽवांतरवाक्यार्थबोधकपदानां साकांक्षत्वा ह्नता सर्वविषयत्वमन्वयबोधविशेषणपत्रोभयान्व शब्दखं
यबोधेनासर्वतत्रैकार्थेनान्वयबोधेऽज्ञातेऽपरान्वयबोधसाकांक्षत्वानिर्वाहापत्तासर्वविषयान्वयबोधानभ्युपेयतासर्व [illegible]
विषयतावच्छेदकपार्श्वकिंचिद्धर्मावच्छिन्नानुपस्थानं निवेशितं तरहीति पदार्थः कर्मत्वमित्यादिपदेभ्यो घटकर्मत्वादयो विशेष
लतया उपस्थिता इति न घटकर्मत्वाद्यन्वयापत्तिरापादनीया विशेषादिजिज्ञासाविरहेत्यर्थः नामार्थादि भक्तीति घटमानयेति [illegible] त्यादाव
७ पीत्याद्यः स्वरूपेणोपस्थितिरिमत्येकपदेभ्यः पृथक्पृथक्स्मातिरित्यर्थः अन्वयप्रकारकजिज्ञासेति घटकर्मकत्वान्वयप्र
कारकाकांक्षाविशेषादिजिज्ञासेत्यर्थः तत्रविशेषणत्वेन घटकर्मत्वाद्युपस्थितितोपि घटः कर्मत्वमित्यादिपदाधीनोपस्थितिवि
लक्षणस्येव वचनात्तदृशाज्जिज्ञासोपगमात् भिनीत्याशंकानिराकरोति नहीति न घटमानयेत्यादौ स्वरूपेणलक्षणयैवोपस्थितितो
९८ वैलक्षण्येन उपस्थितिरिति तद्धर्मवत्त्वादिति भावः अत्र लक्षणामलत्तिमत्सर्वभोराकांक्षानुपपत्तिर्द्रष्टव्या नीर्विभागे कृघटाघन राम ८६
५० या जिज्ञासानुदयादवांतरमात्रपाणामि [illegible] तिराजपुत्ररूपाणामित्यर्थः पश्यमसमितिराजपुत्रान्वयबोधोपन्यासादिशाकारणाविरहा

[illegible]

[illegible] [illegible]

दित्यर्थः तत्पूर्वमुक्तानितान्वयबोधकत्वघटितायाः पुरुषान्वयबोधोपयिकाकांक्षायाः सत्वेन तासर्पादिविरहस्येव
न्वय बोधोत्तरमपि टीकाकारलक्षणमालस्यासिद्धांतयतिअभिधेतिधाधातोर्भावणार्थकत्वया अभिधानपदं यथो
राकांक्षासंगमनीयातदुभयवाक्यपरत्वस्यापर्यवसाने अचरितार्थता प्रकृतशाब्दबोधरूपफलानुपधानमितिमावत्
तथा वतद्विशेष्यकतत्प्रकारकतत्संसर्गकशाब्दबोधेमाहशाबोधाभावः तद्विशेष्याविशेषणपदयोराकांक्षेत्यर्थः पदस्य
वा शाब्दबोधजननेआकांक्षाया सहकारितया [redacted] न स्यात् पदसंबंधितयापदसाकांक्षत्वव्यवहारनिमित्ततानत्वप
दमत्वासन्नत्वमाशाब्दबोधेसमानविषयकशाब्दबोधाभावस्यहेतुत्वात् नवयस्यपेनविनानस्वार्थानुभावकत्वंतस्यतद
पर्यवसानमित्यपिमयं येनपदानिष्ठस्यान्वयानानुभावकत्वस्यापर्यवसानरूपताबस्यतेनस्येवप्रकोतत्पातादपराभा
शात्तत्वथा वाँनेयशाब्दबोधाभावस्यापर्यवसानरूपत्वेविरोधइति वाच्यं पदानिष्ठां[redacted]पानुभावकत्वाभावोहिनान्वयबो
धपूर्ववर्तित्वघटिततदुपधायकत्वस्याभावः तथासतिशाब्दानुभवपूर्वकालेपरेतत्सत्वेनतदभावरूपकारणासत्वात्शाब्द

स॰ ग॰ बोधानुपपत्तेः परंतु शाब्दबोधोपधानाभाव एव सत्त्वात्मानि घशाब्दबोधाभावपर्यवसित इति न च शाब्दबोधोपधानाभा
८७ वः शाब्दबोधवैशिष्ट्याभावः स्वरूपयोग्यपदे चेदं सो सहकारिपदांतरविरहप्रयुक्तः तदा स्वरूपायोग्यपदे प्यसौ तादृश
एवेत्यतिप्रसंगः अभिप्रायः फलोपधायकत्वाभाव एव पदांतरव्यतिरेकप्रयुक्तत्वेनाभिवेशनीयः फलोपधायकत्वस्य च फला
व्यवहितपूर्ववर्तित्वे सति तत्स्वरूपयोग्यत्वात्मकस्याभावः स्वरूपायोग्ये विशेष्ये स्वतःस्वरूपयोग्यताविरहप्रयुक्त ए
वे इति अतिप्रसंगः नवकाशादिति वाच्यं तादृशाभावविवक्षणे पूर्वोक्तानुपपत्तेः ईश्वरतया स्वरूपयोग्यत्वसहितफलवै
शिष्ट्यरूपफलोपधानाभावविवक्षयैव स्वरूपायोग्ये पदे ऽतिप्रसंगस्य वारणीयतायातात् आत्मनोऽपि सत्त्वापि कारणत्वे
न शाब्दबोधस्वरूपयोग्यतया स्वरूपयोग्यतासहितफलोपधानाभावस्य फलकाले एवासत्त्वेन फलाभावपर्यवसितत्वा
त् अतएव मिश्रोक्तमीदृशाकांक्षायामपि शाब्दबोधप्रागभावरूपत्वमपि संगच्छते शाब्दबोधोपधायकत्वाभावस्याकांक्षा रामः ८७
त्वे तदसंगतेः स्वरूपायोग्यपदे साकांक्षत्वव्यवहारवारणाय पदविशेषनिष्ठत्वमपर्यवसानपदार्थेति भावपातीयस्य येने

तिपस्य पदस्य समभ्यर्थे पष्ठी तथा च यत्पदानिष्ठं स्वार्थान्वयाननुभावकत्वं येन पदेन विना यत्पदव्यतिरेकप्रयुक्तं
तस्येति तत्पदस्य पदनिष्ठं इत्यर्थः तादृशप्रयुक्तत्वान्वयाननुभावकत्वं अपर्यवसानं अभिधानापर्यवसानपदार्थः घटादिप
दस्यामादिपदसहकारेण कर्मत्वादौ घटादेराधेयतासंसर्गबोधकतया तद्विषयतादृशसंसर्गाननुभावकत्वम् अमादिप
दव्यतिरेकप्रयुक्तं अमादिपदनिष्ठं च तत्तद्घटादिपदव्यतिरेकप्रयुक्तं सहकार्यसमवधानकाले स्वरूपयोग्यनिष्ठस्य कार्याननुपधा
यकत्वस्य सहकारिविरहप्रयुक्तत्वादिति तत्र लक्षणसमन्वयः कर्मत्वादिपदस्य तादृशान्वयबोधायोग्यत्वात् तद्विरहेण घटादिप
देन तादृशान्वयाबोधकत्वस्य प्रयोजकोऽनवाप्तान्वितं तदभावो यद्घटादिपदव्यतिरेकप्रयुक्तः अतो नातिप्रसंगः नन्वन्वयबोधाननुभा
[illegible] वकत्वस्यान्वयबोधाव्यवहितप्राक्काले निर्वाहायान्वयबोधानुपधायकरूपतया व्याख्यानात् स्वोत्पत्तिका
४६ लेस्वासमकालोपधानस्य स्वाव्यवहितप्राक्कालावच्छेदेन स्वव्यतिरेकेनापि प्रयुक्तत्वात् स्वस्यापि स्वसाकांक्षतापत्तेरिति वा
च्यं दृष्टान्तादत एव आख्यातपदोपस्थाप्ययोः कालविवर्तमानतयोरन्वयबोधनिर्वाहः अत्र अन्वयबोधविशेषे पदविशेष

मू॰ ग्र॰ ज्ञानहेतुतापन्नावच्छेदकत्वं अन्यथा कस्यचित्पदनिष्ठतदनुपधाने पदान्तराविरहः प्रयोजकः न तु सकलपदनिष्ठतदनुपधाने शा॰ खं॰
८८ इत्यत्र नीलामकाभावप्रसंगेन तानुवैवच घटः कर्मत्वमित्यादितो ही प्रकर्मत्वाद्यवबोधानिर्वाहे प्रवोधानुपधानहेतु [illegible]
तापांनिरूपकपदविशेषोपत्वनिवेशनमफलमिति ध्येयं पदस्य ज्ञाप्यमानतया शाब्दबोधहेतुतामतेपि पदविरहे पि नघा
गारपदार्थोपस्थितिसत्वे शाब्दबोधोसत्वापदविरहो न तादृशशाब्दबोधानुपधानप्रयोजकः इति प्रसरज्जन्यपदार्थोपस्थि
तेर्यत्पदजन्यपदार्थोपस्थितिं विना स्वार्थान्वयाननुभावकत्वमिति विवक्षणीयं पदस्य स्मृतावपि हेतुत्वे पदस्वत्वेन ज्ञा
ननिवेशनीयं यत्पदज्ञानजन्योपस्थितिकाले यस्य पदस्य ज्ञानजन्योपस्थितेर्व्यतिरेकः तादृशोपस्थितिप्रयुक्ता [illegible]
न्वयाननुभावकत्व विरहात् पोः पदयोः परस्परसाकांक्षतोपपत्तये यद्धर्मप्रकारकज्ञानजन्यापाउपस्थितेर्यद्धर्मप्रका
रकज्ञानजन्योपस्थितिं विना अन्वयाननुभावकत्वं तत्तद्धर्मावच्छिन्नपदयोः परस्परसाकांक्षत्वं विवक्षणीयं तादृशतादृशधर्मः राम
आनुपूर्वीविशेषरूपं घटपदोपदत्वादिकं तत्तद्धर्मप्रकारकोपस्थितेः तज्जन्यपदार्थोपस्थितेः स्वकदाचित्कदाचिद ८८

कसत्त्वेऽपराभावात्कार्याभावप्रसक्तेर्नानुपपत्तिः एतेन कर्मत्वादिपदेरम्पदत्वादिभ्रमजन्यार्थोपस्थितिकालेपि कर्म
त्वाद्यैर्घटादेराधेयत्वसंबंधबोधोदयात्भ्रमादिपदत्वेन भ्रमादर्थोपस्थितोपि तद्बोधाद्भ्रमादिपदजन्यार्थोपस्थिति
विरहस्याप्रयोजकत्वेपि न दोषः अथ भ्रमघटइत्यादिविपरीतानुपूर्वीज्ञानजन्यपदार्थो[illegible]पस्थितिनोऽन्वयबोधा
नुसत्त्वाद्घटादिपदाव्यवहितोत्तरामपदत्वप्रकारकज्ञानजन्यार्थोपस्थितित्वेनैव शाब्दबोधहेतुतोपगमात्तद्रूपावच्छि
न्नाभावएवान्वयबोधाभावप्रयोजकोनत्वमपदत्वादिप्रकारकज्ञानजन्योर्थोपस्थितित्वावच्छिन्नाभावः तेन रूपेणाहे
तुत्वात् तादृशानुपूर्वीपक्षेचतत्तत्कर्मप्रकारकज्ञानजन्योपस्थितित्वावच्छिन्नाभावस्यैवप्रयोजकत्वं अन्यथा घटादिपदाव्य
वहितोत्तरामपदत्वंप्रकारकसमूहालंबनजन्योपस्थितेरमाहशंपदत्वादिप्रकारकज्ञानजन्योपस्थितित्वावच्छिन्नप्र
तियोगितावच्छेदकविरहस्यान्वयबोधाभावप्रयोजकतया कर्मत्वादिपदे ऽतिप्रसंगात् तथा च कथं मंपदत्वादिधर्मोप
हर्मपदेनोपादेयः नच घटपदाव्यवहितोत्तरामपदत्वादिप्रकारकज्ञानजन्योपस्थिति[illegible]त्वावच्छिन्नाभावस्य शाब्दबोधा

म०ग नुपधानप्रयोजकत्वमादाय्यैव घटादिपदे तदव्यवहितोत्तरामादिपदसाकांक्षत्वमुपपादनीयं कृत्वमादि — पद

८९ त्वावच्छिन्नस्याकांक्षा घटादिपदे नेष्यत एव एवं घटं कर्मत्वमित्यादिवाक्यांतर्गतघटादिपदज्ञानजन्योपस्थितेर्घ शब्द०

टादौ कर्मत्वादिभेदान्वयबोधाजनकतयाऽमादिपदाव्यवहितपूर्ववृत्तिघटादिपदत्वप्रकारकज्ञानजन्योपस्थि

तित्वेनैव तादृशान्वयबोधहेतुतापाउपगंतव्यतया केवलघटादिपदत्वप्रकारकज्ञानजन्योपस्थितित्वावच्छिन्नाभा १०

वस्यान्वयानुभवानुपधानाप्रयोजकत्वादमादिपदे घटादिपदत्वावच्छिन्ननिरूपिताकांक्षायाअनिर्वाहेपि न क्षति

७ :अमादिपदे अमादिपदाव्यवहितपूर्ववर्त्तिघटादिपदत्वावच्छिन्नस्याकांक्षायाएवउपगंतव्यत्वादित्तिवाच्यं एव

मपि घटमित्यादेकवाक्यांतर्गतघटादिपदस्यतदेकरपरताहशावाक्यांतर्गतामादिपदसाकांक्षतापत्तेर्दुर्वारत्वात्तएतेन क ८

र्मत्वादिविषयकशाब्दबोधे घटादिपदाव्यवहितोत्तरामादिपदत्वप्रकारकज्ञानजन्यकर्मत्वाद्युपस्थितित्वेननहेतुता राम

अपितुअमृपदत्वादिप्रकारकज्ञानजन्यकर्मत्वाद्युपस्थितित्वेनैव एवं घटादिविषयकशाब्दबोधेपि अमादिपदाव्यवहितपू ८९

र्वत्वमनेन तद्भाव्यं घटपदत्वादिप्रकारकज्ञानजन्यघटत्वोपस्थितित्वेनैवास्य घटइत्यादिवाक्याच्छाब्दबोधवारणा
पार्थविशेषमनेन तद्भाव्यं घटमित्याद्यानुपूर्वीप्रकारकज्ञानत्वेन पृथगेकैककारणता कल्प्यते अप्यद घटपदत्वा
दिप्रकारकज्ञानजन्योपस्थित्या शाब्दबोधजननेनाहशानुपूर्वीज्ञानस्य सहकारिणोपगमेन विपरीतानुपूर्वीज्ञाना
च्छाब्दबोधापत्तिवारणासंभवात् तादृशानुपूर्वीज्ञानस्य स्वतन्त्रकारणताकल्पनापेक्षया पदार्थोपस्थितिकार
णतायामेव तादृशानुपूर्वीज्ञानजन्यत्वनिवेशनमुचितमिति वाच्यं प्रकृते यस्य यस्य वशात्कालस्याभेदेनार्थभूपस्था
दर्थभेदेन पदार्थोपस्थितीनां बहुतरकारणतापत्तेः तिप्रत्ययानुपूर्वीज्ञानजन्यत्वनिवेशे एकैकमर्थमनेन भाव्य एकैक
प्रकृतिप्रत्ययादिजन्योपस्थितेर्बहुविधप्रकृतिप्रत्ययादिभेदेन कारणताभेदात्कारणताबाहुल्यप्रसंगात्प्रकृ
तिप्रत्ययानुपूर्वीज्ञानानामर्थभेदमनिवेश्य पृथक्पृथक्कारणताकल्पनस्यैवोचितत्वात् कुम्भ इत्यादिवाक्यजन्यशाब्दधीघटामि

म॰ग्र त्याद्यानुपूर्वीज्ञानादिव्यभिचारस्यार्थविशेषावबोधकत्वस्य कार्यतावच्छेदके प्रवेशेऽपि दुर्वारत्वप्रकारणाव्यवहितोत्तरत्वस्य त शब्दखं॰
९० त्प्रवेशे च वैरूप्यकत्वयात एवार्थविशेषानिवेशेऽपि व्यभिचारस्यासंभवादिति घटपदाम्बरत्वादेर्मकार[illegible]ज्ञानजन्यबोधस्येव त्वा २
वाद्युत्वाभावस्यान्वयबोधानुपधानप्रयोजकत्वं दुरपह्नवमित्यतोऽपि न[illegible] उक्तातिप्रसंगस्य अम्बरत्वादेः साकां
८० क्षत्वप्रसंगस्य च दुर्वारत्वात्ताकांक्ष्यं पदविशेष्यकपदप्रातियोगिकयादृशधर्मप्रकारकज्ञानत्वेन यादृशान्वयबोधहेतु
तातत्पदस्य तत्पदप्रतियोगिकं तादृशधर्मवत्त्वं तादृशान्वयबोधानुपधानसहितं तादृशान्वयबोधोपधायिकं तत्पदाकां
क्षेत्युच्यते तादृशधर्मः घटपदे प्रकृतिपदाव्यवहितोत्तरत्वं प्रकृतौ च प्रत्ययपदाव्यवहितपूर्वत्वं विनिगमनाविरहेणोभय राम
ज्ञानस्यैव शाब्दबोधहेतुत्वादेकतरज्ञानादपि शाब्दबोधोत्पत्तेरनुभाविकत्वात्परस्परानिरपेक्षयोस्तयोर्ज्ञानयोः शाब्दबोधो ९०
४ पधायकताव्यभिचारवारणरीतिरुक्तैव अथैवं घटपदाविसारि[illegible] वि[illegible]भक्तेः पूर्वपदसाकांक्षतानुपपत्तिः [illegible]
पत्तिरित्याद्युक्तदूषणं यथानाद्यादिपदसाकांक्षताविभक्तेर्नस्यात् [illegible] व्यवधानात् [illegible] तिरिक्तपदस्य च यथाभावस्य

विवक्षितत्वान्नायं दोषः इति नव्यास्तं नामत्वादेरनुपस्थितिदशायां अविशादबोधोदयात् तादृशान्वयबोधे न ज्ञानस्य
तद्धेतुत्वात् तस्य च तद्धेतुत्वे घटपदाद्यानयनीत्यत्र घटादिपदशक्तिग्रहाभावात् योग्यतादिज्ञानविरहाद्वा पदार्थान्व
यः तत्रापि कर्मत्वादौ घटाद्यन्वयबोधप्रसंगात् न हि द्वंद्वस्थले समासांगैकपदार्थानन्वये — परपदार्था
न्वयं कापि दृश्यते एवं राजपुरुषं पश्यतीत्यादौ तत्पुरुषेऽपि पूर्वपदार्थस्य राजादेर्विभक्त्यर्थेऽन्वयस्यादिति चेन्न समा
सस्थले समासाव्यवहितोत्तरत्वस्यैव प्रत्यये समासघटकतत्तत्पदाकांक्षात्वोपगमात् तज्ज्ञानस्यैव प्रत्ययार्थे तत्तत्प
दार्थान्वयबोधहेतुत्वात् राजपुरुषमित्यादितत्पुरुषस्थले पूर्वपदस्येतरविशेषणत्वेन स्वार्थपरत्वाग्रहीत्वात् त
दर्थेन विभक्त्यर्थान्वयः द्वंद्वसमासस्थले समासघटकैकपदार्थेन विभक्त्यर्थान्वयबोधे अपरपदार्थेन विभक्त्यर्थान्वयबो
धसामग्र्या अपेक्षणीयतया नोक्तातिप्रसंगः प्रकृते प्रत्ययाभावोपत्र नास्ति तत्र तत्तत्पदार्थान्वयबोधे तत्पदयो
रेकधर्मिकापरपदसमभिव्याहारज्ञानस्य हेतुतया तत्पदसमभिव्याहारतत्तत्पदे तत्तत्पदसमभिव्याहारत्वेन तत्पदाको

[illegible]

हू॰ ग ॥अतो नाविभक्त्यवीक्यांतर्गतपदयोराकांक्षासमभिव्याहारस्वपरस्परसहकारेणान्वयबोधकत्वाभिप्रायविषयत्वं उ
२२ द्देश्यविधेयभावेनान्वयबोधे समभिव्याहारवत्सो वा पर्यायमप्याकांक्षा अतएव यन्नोद्देश्यवाचकपदपूर्वं विधेयवाचे
कपदं प्रकारोत्थयमेवेत्यादौ तत्रेनाकांक्षेति विधेया विमर्शनं दोषः एतासामाकांक्षाणां विशिष्यवि [redacted]
शिष्यताहेसरूपेणज्ञानं हेतुः ननु निरूप्याकांक्षाव्यवहारविषयत्वाव‍च्छेद
करूपेण शाब्दानुभवजनकतावच्छेदकप्रकारताश्रयधर्मत्वेनतात्त्वज्ञानहेतुतायां मानाभावान्विशेषरूपेण हेतुत्व
मा आवश्यकत्वं चानुपूर्व्यादीनां विशेषतः संदेहे विपरीतज्ञाने च शाब्दबोधानुत्पत्तेः घ वमान पतिर्वैत्र इत्यादौ घटा
दिपदैरमादिपदानां परस्परमाकांक्षासत्त्व मुपपादयति नामेति नमपदं घादिपदि [redacted] कत्वदादिपभाक्तिपदं अमादिस एव
विभक्तिपदं धातुपदं नीप्रभृतिः आख्यातपदं तिवादिः क्रियापदं आनयतीत्यादिः आख्यातांत समुदायः कारकपदं य २२
टमित्यादिः सुबंत समुदायः एतेषां नामसंयोः सुपधात्वोः धात्वाख्यातयोः क्रियाकारकपदयोरित्यावत्परस्परं विना

परस्परोपस्थितिव्यतिरेकप्रयुक्तं परस्परस्य परस्परोपस्थितेर्न स्वार्थान्वयानुभावकत्वं परस्परार्थान्वयानुभावक
त्वाभावः अतस्तत्तत्सरहस्यस्य मिथः साकांक्षत्वे विशेषः ननु समानविभक्तिकयोर्नीलघटादिरूपविशेष्यपदयोरप्याकां
क्षाया आवश्यकत्वं अन्यथा नीलघटयोर्विशेष्यभावेनान्वयबोधानुपपत्तेरिति कथं नामपदं नामपदमात्रस्याकांक्षा अ
भिहितेत्याकांक्षायां परमते नीलघटयोर्विशेष्यविशेषणभावेनान्वयबोधो न भवत्येवातो नामपदयोः साकांक्षत्वविरहेपि
न क्षतिः स्वमतेपि तयोर्भेदेनान्वये नाकांक्षा अपितु नीला इत्यादस्य धर्मिपरतया तद्धर्मिणो घटादावभेदेनैव विशेष
णतास्वीकारादभेदेनान्वयबोधरावाकांक्षा नामादिपदानां विभक्त्यादिमात्रेण साकांक्षत्वं च भेदान्वयाभिप्रायेणाभिहितमि
त्याह परमते इत्यादि परो मीमांसकः इत्यादौ इत्यादिना अरुणया गवेत्यादिपरिग्रहः नामार्थादीनां नीलादीनां कारकाणां
च घटादीनां नन्वेवं समन्वितेऽपि भयत्राप्यभेदान्वये समानविभक्तिकपदयोः सांकांक्षत्वोपाधिना दशान्वयबोधोपगम रा ७
मेन संभवात् नादशान्वयबोधः कथं परैर्नोपेयत इत्यत आह विशेषणान्वितेति विशेषणपदोत्तरविभक्त्यर्थः कर्मत्वादिः

लो घटोऽस्तीत्या दौ नीला देः स्यात् तथैराकिंयान्वयवादिमीमांसकम्म ०

श्रा॰ तदनन्वयेन नादशाविभक्तेरसाधुतापत्तेरित्यर्थः कर्मत्वाद्यर्थेरावद्द्वितीयादेरनुशिष्टत्वादि [illegible] तिभावः यद्यपि नी
८२ [illegible]

[redacted] तेपि क्रियाविशेष्यतया तदन्वयात्प्रथमायाः कर्तृत्वं नार्थः तथापि संख्याबोधकतया सार्थकत्वं न च
विशेषणं विशेष्यभावेन नीलघटयोरन्वयेपि नीला [illegible] दिपदोत्तरप्रथमायाः नीलाद्यन्वितसंख्याबोधकत्वमुपेयत इति
तन्मतेपि नत्सार्थक्यस्योपपत्तिरिति वाच्यं घटपदोत्तरप्रथमया घटे एकत्वादिबोधनेनैव तदर्थत एकघटनिष्ठाभेदप्रतियो
गिनीलेप्येकत्वलाभात्तन्नैकत्वादिबोधोपगमस्यार्थक्येन रूप्यस्तत्वात् नच परमतेपि नीलघटपदयोरभेदान्वयबोधस्यो
त्तरकालिकतया घटैकत्वलाभान्नीलेप्येकत्वलाभो भवतीति नीलपदोत्तराविभक्तेरेकत्वपरतानसंभवतीति वाच्यं नील रम॰
पदोत्तराविभक्तेरेकत्वपरतायामेव विभक्त्यर्थस्य विशेष्यगताभिन्नेकत्वपरमापादकत्वस्य नानैश्चयार्दन्वयानुपपत्त्या धर्मि ८२
णोरभेदलाभसंभवेन तदुपयोगित्वया विशेषेणाविनाविभक्तेरेकत्वपरतायाऔचित्यात् एवं नीलोऽस्तीत्यत्रैपयाथार्थक्यं
—तु ०स्तु हेत्वाहुः

यबोधः तथा तन्स्य लक्षणसामग्रीवशा[redacted]नीलघटो स्तीत्यत्रापि वाक्यार्थद्वयबोधस्य स्वीकारसंभवान्नीलपद घ
टपदयोः परस्पराकांक्षया घटितसामर्थ्यंतरं कल्पयित्वा तदर्थयोर्विशेषणविशेष्यभावेनान्वयबोधकल्पनमयुक्तमि
ति धेयं न विशिष्टवैशिष्ट्येनान्वय इति न नीलादिविशेषितघटादेः क्रियान्वयबोध इत्यर्थः अपि तु नीलोस्ति घटोस्ति
नील मानय घट मानयेत्यादिवाक्यार्थद्वयबोध एव विशेषः अथैवं तादृशवाक्यात् नीलपदादेः पीतघटादौ च ५५४
प्रवृत्तिः स्यात् एवमरुणया गवा सोमं क्रीणातीत्यादौ आरुण्यशून्यगवा अरुणपटादिना च सोमक्रयणे शास्त्रार्थ
स्यादित्यत आह कं त्विति समा[redacted]ज्ञः नीलघटादयाः परस्परसंवलनेन बोधः आकांक्षाधीनः अर्थात् तु रूपांतरकांक्षि ६०
कः अयमाशयः एकजातीयविभक्त्यवभिन्नैकत्वाभिन्नकर्मत्वादिपरत्वापालम्बनेन निर्व्यापाद्यन्यथानुपपत्त्या घटा-
दौ नीलाद्यभेदलाभः तन्मते आह्यादिपदं गुणपरमेव गुणस्यैव मुख्यार्थत्वात् शब्दस्य मुख्यपरत्वसंभवे लक्षणानौ ५
चित्यात् द्रव्यपरत्वे कृपणसाधनत्वेनैकद्रव्यलाभे साधनत्वेन द्रव्यांतरान्वये आकांक्षानुपपत्तेरपि द्रव्यपरत्वासंभवात् गुण

६४

प्र-ग परत्वे तु गुरुत्वस्य रूपस्य कपसाधनत्वेनाविधानेतस्य धर्म्मिभूतद्रव्यमंतराकत्वेवसाधनत्वमितिमतिसंधानाल्लक्षिं द्र शब्द०
२३ व्यमंतराकत्वसाधनत्वमित्याकांक्षोदपात् स्वाश्रयगोद्वाराकर्मसाधनत्वमित्येलक्षाभायगवेत्यनेनगोः कपसा
धनत्वेनविधानोपपत्तिः गोद्वाराआरूपस्य कपसाधनत्वे च गोरारूपापंर्वि नानुपपन्नामिति तत्र तादृशोपलक्षणलत्वा
भः तदुक्तं तृतीयया गुणस्यैव करणत्वं क्र [redacted] येमतिविस्पष्टंगस्य तेतत्र द्रव्यद्वारैव गुणस्येत्ति तद्वारूपयेसस्य गु
णपरत्वे स्त्रीत्वलिंगतानुपपत्तिः गुणिद्वारा गुणस्य कर्मसाधनत्वपा गुणिनोपि करणत्वेतावयात् गुणिपरत्वमालड्ड
११नः [redacted]
अत एव जातिपुरस्कारेण धर्म्मिबोधकानां गवादिपदानां भट्टमते यथा जातावेव शक्तिः तस्याः आश्रयद्वाराकर्मत्वात् धन्व राम
यः अनंतरमासेष्वाख्यकेः कर्मत्वलाभः तथा गुणादिपुरस्कारेण बोधकानामपि शुक्लादिशब्दानां वैयाकरणरीत्यालंका २३
रिकैश्च गुणादेरेव तद्वाजा तोवाशक्तिः द्रव्यद्वारैव तत्र क्रियाकर्म्मलाघवत्वपइतिद्रव्य [redacted] सेयनोलाभस्त्वयत्नेतदुक्तंसंक्रांतिनश्च

न्तर्भेदोऽत्रा स्यादिति जगदीशेनैवेति एवं च तन्मते ऽरुणादिपदस्य गुणिन्यर्थे तात्पर्ये लिङ्गान्तरपरिग्रहेऽप्युपपद्यते अस्मा
कं नैयायिकानां अभेदानुभवानुरोधात् नञ्जो भेदस्वार्थतोऽलाभसंभवात् कथं तदनुरोधादभेदः शाब्दधीविषय इति
वाच्यं विभक्तिहृदयस्यैकैकमत्वादिपरतानिश्चयं विनापि तयोरभेदबोधस्यानुभविकत्वात् संसर्गतया शाब्दबोधवि
षयत्वसंभवः तथा च तदुपस्थापकपदाभावेऽपि न क्षतिरिति भावः नन्वेवं विभक्तेर्वैयर्थ्यमत आह विभक्तिरिति विशेष
णपदोत्तरविभक्तिरित्यर्थः साधुत्वार्थमिति अभेदान्वयबोधोपयिकाकांक्षानिर्वाहार्थः असमासे समानविभक्तिक
पदयोः समभिव्याहारस्यैवाभेदान्वयबोधोपयिकत्वादिति भावः अथवा प्रकृतिभूतनामपदस्याविभक्तिकत्वे ऽसा
धुत्वार्थमिति यथाश्रुतमेव तानेन समासानुरोधादि [illegible] ... विभक्तिराहित्यस्यापि विशेषणपदानि विशेष्यपदात् प्रकृतिस्वरू
प[illegible]स्यैवाभेदान्वयबोधोपयिकाकांक्षात्वस्वीकारे [illegible] विशेषणपदोत्तरविभक्तिविरहेऽप्याकांक्षोपपत्तावपि न क्ष
तिः विभक्तिप्रकृतित्वं च नदव्यवहितपूर्वत्वे सति संबध्यमानत्वं तेन शोभनं रूपं यस्यादौ विशेष्यपदस्योत्तरं विभक्त्यसत्त्वेऽपि

म०ग० नुसंधीयमानप्रथयाप्रकृतित्वेरूपवान्घटइत्यादौविशेषणपदस्यचाविशेष्यपदाप्रकृतिकानुसंधीयमानप्रथमा
९४ प्रकृतित्वमुपपद्यतेनैवमपि विशेषणाविशेष्यपदयोः सर्वत्रभिन्नाविभक्तिव्यक्तिप्रकृतितयाविरुद्ध
विभक्तिराहित्यम समासस्थलेतुघटं विशेष्यपदाप्रकृतिकत्वेनेनाविशेष्यपदप्रकृतिकाविभक्तिविजातीयत्वाविवक्ष
णेचनीलघटरूपमित्यादौविशेष्यवाचकघटपदप्रकृतिकविभक्त्यप्रसिद्ध्याऽनुपपत्तिरितिवा विशेष्यवाचकपद
प्रकृतिकैत्यनेनतादृशपदाव्यवहितोत्तरत्वेनानुसंधीयमानात्वविभक्तिविभाजकधर्मवत्तस्यविवक्षणात्समासात्
३० वेत्कृतोः समासस्थलेसमानाविभक्तिकत्वमेवाभेदबोधेतं नतुनिरूढानुगतंरूपं तथासतिघटोनीलस्यादावपिघटोनीला
नीलाद्यभेदान्वयापत्तेः समासस्थले तुविशेषणाविशेष्यपदयोःअव्यवहितपूर्वापरभावइत्येवतत्त्वंनचद्वितीयादिविभ
क्तेः कर्मत्वाद्यभानेतस्याअसाधुतापत्तिर्दुर्वारैवकर्मणिद्वितीयेत्यनुशासनाविषयत्वादितिकथंविशेषणविभक्तेर्निरर्थक राम
२० त्वोपगमइतिवाच्यंविशेषण विभक्तेर्निरर्थकत्वे विशेषणपदस्यविशेष्यपदसमानाविभक्तिकत्वानुशासनबलेनतत्साधुत्वसं ९४

भवान्न नीलरूपाणां पाकजेत्य[illegible]गन्धरूपाभेदान्वयबोधोपगमे तत्र तदभेदविधानाकांक्षा साधनतया विधेयभूतायां विधेय
त्वोनुवाद्यत्वादिरूपद्वयसमावेशः तदुभयाविरोधश्चोद्देश्यतयाभासमानः एव विधेयतयाभासत इत्यस्य स्वीकाराप्य
हत्वादिति तत्र वाक्यभेद एव साधीयानिति वाच्यं गवां ___ शोऽरूपाया अभेदेनाविधानेपि साधनाकांक्षायां
साधनतया विशिष्टयागोद्देशेन विधाने समीहितसिद्धेः विशेषणविभक्तेः अर्थबोधकत्वमपि संभवतीत्याशयेनाह यद्वेति
समानविभक्तिकयोः समानविभक्तिकपदोपस्थाप्ययोः अभेदार्थकत्वमिति तथा च नीलोत्पलयोः भेदः प्रकारतयेव घ
[illegible]टादौ भासत इति भावः ननु प्रमेयं वाच्यमित्यादौ वाच्यत्वाद्यवच्छिन्नभेदप्रसिद्ध्या तदभेदाप्रसिद्धेरभेदार्थकत्वं विभक्तेर्न
संभवतीति तन्न व्यक्तित्वावच्छिन्नभेदाभावस्य तत्र व्यक्तिविशेषणतया भानं तु भेदे तत्तद्व्यक्तित्वावच्छिन्नान्वयेनैव निर्वहति स
च तेन रूपेण विशेषणपदादनुपस्थित्या न संभवति विशेषणतावच्छेदकाश्रयप्रतियोगिकभेदाभावस्य च प्रतियोगिप्रसि
द्धावपि न प्रसिद्धिः वाच्यत्वाश्रयप्रतियोगिकभेदस्य सर्वत्र सत्त्वात् तादृशभेदप्रतियोगिताकाभावः प्रसिद्ध इति चेत्तत्र स्याद्याव

म॰ ग तैकतयापरः कंबुग्रीवादिर्नित्यादेर्योग्यतापत्तिरिति चेन्न अभेदस्य संसर्गतापक्षेपि एतद्दोषसंभवात् न च तत्तद्व्यक्ति शाब्दखंड
२५ त्वावच्छिन्नभेदाभावस्य तत्तद्व्यक्तौ तत्तद्व्यक्तिसंसर्गतयाभानं संभवति संसर्गघटकतत्तद्व्यक्तित्वानुपस्थितावपि तद्भा
नसंभवादिति वाच्यं संसर्गतासंबंधज्ञानस्य शाब्दबोधहेतुतया तत्तद्व्यक्तित्वानुपस्थितौ संसर्गघटकतयापि तत्त्वभानासं
४ भवात् तस्मादभेदेन नभेदाभावः आधेयत्वं तदितित्वावच्छिन्नधर्मस्यैव तद्भेदः तस्य च संसर्गत्वं प्रकारतयापि भानं नीलं घ
टं इह अभेदप्रतियोगितयाभासमानव्यक्तीनां उपस्थितावशेषणतावच्छेदकरूपेणैव भानोपगमात् तत्तद्व्यक्तित्वेनोपस्थितेरन
पेक्षणात् एकत्वादिविशेषणतावच्छेदकाद्यधर्मस्य तद्व्यक्तित्वावच्छिन्नस्यान्यत्रासत्त्वात् भिन्नरूपेणैकरूपेण वाभिन्नव्यक्तिद्वय
परसमानविभक्तिकपदद्वयोर्न योग्यता आकाशौ द्वावित्यादौ द्वित्वेन भासमानस्याकाशस्यातिरिक्ताभेदो घट्याकाशोऽस्तीति राम
थापि तेन रूपेण भासमानस्य व्यक्त्यंतरस्यापि तत्राभेदभानात् तस्य बाधितत्वेन न तदाकांक्षस्य योग्यताभाव तद्व्यक्त्यंतरस्यादि २५
त्वरूपेण यत्र न भानं तत्रैव योग्यता प्रसंग इति वाच्यं पर्याप्तिसंबंधेन द्वित्वादिमासज्यवृत्तिधर्मप्रकारेण पत्रैकमात्र

विशे

वभक्तिभानं तादृशखुद्देश्यप्रमात्वात्तज्जनकवाक्यस्याप्यत्वाप्रसक्तेः पत्र्यासङ्गाति धर्मस्याविशेषणतावच्छेदकत्वमनन्तर
वच्छिन्नभेदाभावरूप एवाभेदोऽभिभासते सच तादृशधर्म एव तस्य च विशेष्यतावच्छेदकावच्छेदेनैवान्वयात् एकमात्रवृत्ति धर्म
स्य च व्यासज्यवृत्तिधर्माधिकरणतानवच्छेदकत्वात् वाधितत्वाकाशत्वाद्यवच्छिन्नाधिकरणत्वावगाहनेनाकाशोऽयमित्यादि
वाक्यजन्यबुद्धेर्भ्रमत्वानिर्वाहश्चेत्याकुः एतन्मतेच घटोनीलइत्यादौ नामार्थयोरभेदाभाव एव प्रत्याय्यते इति संसर्गाभा
वरोवनमोऽर्थः समासस्थले चाभेदः संसर्गतयैव भासते तदर्थकविभक्त्यविरहात् मतद्वय एव नीलोघट इत्यादौ समानवि
भक्तिकपदयोरभेदविषयकान्वयबोधे आकांक्षामुपपादयति अत इति समानविभक्तिकपदयोः [illegible] भेदानुभवबो
ग्यत्वादित्यर्थः विशेषण [illegible] विशेष्यभावानुभावकत्वमिति विभक्त्यर्थद्वारा अभेदसंबंधेन साक्षात् दानीलघटयोर्वि
शेषणविशेष्यभावेन अनुभावकत्वमित्यर्थः तत्पदयोः तादृशनीलघटादिपदयोः परस्परं विनाननुतादृशपदयोः तादृशा
न्वयानुभावकत्वाभावः परस्परव्यतिरेकप्रयुक्त इति समुदायार्थः अथाविभक्त्यर्थाभेदमते तन्न्वये विशेष्यपदस्याविशेषण

मू॰ग पदसमानविभक्तिकत्वं नापेक्ष्यते राहोः शिरः धान्येन धन [illegible] मित्यादौ षष्ठीतृतीयार्थाभेदस्यप्रथमान्तपदार्थेऽन्वयात् तथा च नी शद्व॰
९६ लो घट इत्यादाविव नीलं घट इत्यादाव पि द्वितीयार्थाभेदस्य घटादावन्वयप्रसंग इति चेन्न् अभेदस्य संस
र्गतामतेन संसर्गकबोधे समासातिरिक्तस्थले समानविभ [illegible] क्तिकपोरेवाकांक्षा विभक्त्यर्थाभेदमते च तृतीयाषष्ठ्याभि
वा विभक्त्यंतरेणाभेदबोधनेपि समानविभक्तिकेनैवासमानविभक्तिकेनापि पदेन तदाकांक्षा परं तु षष्ठीतृतीयातिरिक्त
विभक्तेः सजातीयविभक्तिरहितविशेष्यपदसमभिव्याहारे साधुता अनुशासनाविरुद्धत्वात् अतो नीलं घट इत्याद
यो न प्रयोगाः न चैवं षष्ठीतृतीययोरपि साधुता तज्जातीयाविभक्तिरहितविशेष्यपदयोगेन स्यात्तु विशेषणपदयोः समा
नविभक्तिकत्वानुशासनाविरोधादिति वाच्यं विशेष्यपदे षष्ठ्यादेरसत्त्वेपि विशेषणपदोत्तरं षष्ठ्या प्रयोगात् अश्रुतस्यापि ७
तादृशापकानुशासनस्यकल्पनीयत्वात् मीमांसकमते द्वारमित्युक्ते अध्याहृतापिधानादिना द्वारे कर्मत्वान्वयबोधात्तथा राम
धानस्तुपस्थापकपदाभावेपि तदुपस्थापकानुमाना ९६

दिनाश्रुतपदस्याकांक्षेति येनेत्यत्र पदत्वादिविवक्षाभिप्रायेणादर्शप
१९ तिद्वारमित्यध्याहारं विनापि धानोप पकानुमानादिव्यतिरेकप्रयुक्तं न स्वार्थान्वयानुभावकत्वं श्रुतप
दस्यापिधानान्वितस्वार्थबोधकत्वमिति न तदाकांक्षेत्यग्रिमेणान्वयः अतः श्रुतपदेन तदाकांक्षेत्यर्थः अनुमानादिविरह
स्यान्वयबोधानुपधानप्रयोजकत्वे हेतुमाह भातियोग्यत्वलाभादिति अत्राप्यध्याहारं विनेति काकाक्षिन्यायेन संबध्यते न
थाचानुमानादिकं विना अन्वयप्रतियोगिपिधानाद्यनुपस्थितेरित्यर्थः तथा चापि धानोपस्थापकानुमानादेः शा
ब्दबो[illegible]धाजनकत्वेपि तज्जनकान्वयप्रतियोग्युपस्थितिजनकत्वेन तदुपयोगितया न व्यतिरेकस्यान्यथानुप
[illegible]धानप्रयोजकत्वमध्याहृतमिति भावः अनुमाना[illegible]देरन्वयानुभवाजनकत्वे तस्यानुपधाने स्वभावं एवेति ८
